# MG University, Kottayam

**Model Question Paper**

**Restructured Syllabus - PGCSS**

**MA Programme Sanskrit (Special) Vedanta**

**I Semester - Course IV**

**Core IV**

**भगवद्गीताशाङ्करभाष्यम्।**

संस्कृतभाषया उत्तराणि देयानि। देवनागरी लिपिरुपयोक्तव्या ।

Time: 3hrs. Weightage: 30

I **पञ्चानां श्लोकानामाशयं विशदयतः-**

१. युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते।।

२. इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः।।

३. बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्।।

४. युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।

५. असंयतात्मना योगो दुष्प्राप इति मे मतिः।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः।।

६. दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।।

७. नाहं प्रकाशः सर्वस्य योगमायासमावृतः।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम्।

८. यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः।। 1×5 ~~5x1~~= 5

पञ्च अधिकृत्य लघूपन्यासं लिखत

९. कर्मसन्न्यासात् कर्मयोगः कथं विशिष्यते इति भाष्यदिशा विवृणुत।

१०. आत्मनः स्वतः कर्तृत्वं कारयितृत्वञ्च नास्तीति भाष्यकारमतं स्पष्टयत।

११. योगं युञ्जानस्य आसनाहारविहारादीनां नियमान् विवृणुत।

१२. संन्यासकर्मयोगयोः मिथः सादृश्यं निरूपयत।

१३. योगमारुरुक्षोः मुनेः योगारोहणसाधनत्वं कर्मणः कथं संभवति ?

१४. आत्मविशुद्धये योगं कथं युञ्ज्यात् ? विशदयत।

१५. चतुर्विधा भजन्ते माम् - विस्तरेणाशयमुपपादयत।